यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्शति ।

शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १२.१७ ॥

yo na hṛṣyati na dveṣṭi na śocati na kāṅkśati |
śubhāśubhaparityāgī bhaktimānyaḥ sa me priyaḥ || 12.17||

समः शत्रौ च मित्रे च तथा मानापमानयोः ।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १२.१८ ॥

samaḥ śatrau ca mitre ca tathā mānāpamānayoḥ |
śītoṣṇasukhaduḥkheṣu samaḥ saṅgavivarjitaḥ || 12.18||

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।

अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १२.१९ ॥

tulyanindāstutirmaunī santuṣṭo yena kenacit |
aniketaḥ sthiramatirbhaktimānme priyo naraḥ || 12.19||

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ १२.२० ॥

ye tu dharmyāmṛtamidaṁ yathoktaṁ paryupāsate |
śraddadhānā matparamā bhaktāste'tīva me priyāḥ || 12.20||